# विभक्तयः

शब्दाःअथवा 'पदं' सुबन्तं तथा तिङन्तमिति च द्विधा विभक्तमिति पूर्वम् उक्तं खलु । सु , औ , जस् इत्यादीन् एकविंशति प्रत्ययान् प्रातिपदिकेन ( मूलपदेन सह) योजयित्वा यानि नामपादानि निष्पाद्यन्ते तान्येव सुबन्तानि इति कथ्यन्ते । सामान्यतः एकस्य शब्दस्य विविधानि रूपाणि सन्दर्भानुसारं प्रयुज्यन्ते । तान्येव विभक्तिरूपणीति व्यवह्रियन्ते । क्रियासम्बन्धं दर्शयितुमेव नामपदानां रूपभेदः सम्भवति इति सामान्येन वक्तुं शक्यते ।

यथा - रामः वदति । अध्यापकः रामं वदति । अत्र द्वयोः वाक्ययोः 'राम' शब्दस्य रूपभेदः दृश्यते । एषः भेदः सन्दर्भानुसारमेव प्रवृत्तः ।

एतेषां सुबन्तानां सप्तविभक्तयः सन्ति । ताश्च प्रथमा , द्वितीया , तृतीया , चतुर्थी , पञ्चमी , षष्ठी , सप्तमी इति। सम्बोधनप्रथमा इति प्रथमाविभक्तेः एकः भागः इत्यतः सा विभक्तिः पृथक्तया न परिगण्यते ।

| **'सुप्' प्रत्ययाः ।** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमाविभक्तिः | सु( स्) | औ | जस्( अस्) |
| द्वितीयाविभक्तिः | अम् | औट्( औ) | शस्( अस्) |
| तृतीयाविभक्तिः | टा( आ) | भ्याम् | भिस् |
| चतुर्थीविभक्तिः | ङे( ए) | भ्याम् | भ्यस् |
| पञ्चमीविभक्तिः | ङसि( अस्) | भ्याम् | भ्यस् |
| षष्टीविभक्तिः | ङस्( अस्) | ओस् | आम् |
| सप्तमीविभक्तिः | ङि( इ) | ओस् | सुप् |

प्रत्येकं विभक्तेः अर्थभेदाः सन्ति । अकारान्तादिशब्दानां सप्त विभक्तयः सन्ति इति सूचयन् बालप्रबोधनस्थः श्लोकः अधः दीयते ।

' പ്രഥമാ ച ദ്വിതീയാ ച

തൃതീയാ ച ചതുർത്ഥ്യപി

പഞ്ചമീ ഷഷ്ഠിയും സപ്ത-

മ്യേവമേഴു വിഭക്തികൾ'

**विभक्तीनां अर्थभेदाः**

അതെന്ന് പ്രഥമയ്ക്കർത്ഥം

ദ്വിതീയക്കതിനെ പുനഃ

അതിനോടതിലേക്കെന്നും

ദ്വിതീയക്കർത്ഥമായ്വരും

തൃതിയാ ഹേതുവായിട്ടു

കൊണ്ടാലോടൂടെയെന്നപി

ആയിക്കൊണ്ടു ചതുർത്ഥീ ച

സർവ്വത്ര പരികീർത്തിതാ

അതിങ്കൽനിന്നു പോകെകാൾ

ഹേതുവായിട്ടു പഞ്ചമീ

ഇക്കുമിന്നുമുടെ ഷഷ്ഠി-

ക്കതിന്റെ വെച്ചുമെന്നപി

അതിങ്കൽ അതിൽവെച്ചെന്നും

വിഷയം സപ്തമീ മതാ

വിഭക്ത്യർത്ഥങ്ങളീവണ്ണം

ചൊല്ലുന്നു പല ജാതിയും

| | | | |
|---|---|---|---|
| പ്രഥമാ | അത് | ബാലഃ | ബാലൻ |
| ദ്വിതീയാ | അതിനെ | ബാലം | ബാലനെ |
| | അതിനോട് | ബാലം | ബാലനോട് |
| | അതിലേക്ക് | ഗൃഹം | വീട്ടിലേക്ക് |
| തൃതിയാ | ഹേതുവായിട്ട് | ബാലേന | ബാലൻഹേതുവായിട്ട് |
| | കൊണ്ട് | ബാണേന | ബാണംകൊണ്ട് |
| | ഓട് | ബാലേന | ബാലനോട് കൂടെ |

| | | | |
|---|---|---|---|
| | ആൽ | രാമേണ | രാമനാൽ |
| | ഊടെ | വനേന | വനത്തിലൂടെ |
| ചതുർത്ഥി | ആയിക്കൊണ്ട് | ബാലായ | ബാലനായിക്കൊണ്ട് |
| പഞ്ചമി | അതിങ്കൽനിന്ന് | വനാത് | വനത്തിൽ നിന്ന് |
| | കാൾ | ബാലാത് | ബാലനേക്കാൾ |
| | ഹേതുവായിട്ട് | പുണ്യാത് | പുണ്യം ഹേതുവായി |
| ഷഷ്ഠി | ഇക്ക് | മമ | എനിക്ക് |
| | ഇന്ന് | അസ്യ | അവന് |
| | ഉടെ | സീതായാഃ | സീതയുടെ |
| | വെച്ച് | ബാലാനാം | ബാലന്മാരിൽ വെച്ച് |
| | അതിന്റെ | ബാലസ്യ | ബാലന്റെ |
| സപ്തമി | അതിങ്കൽ | ബാലേ | ബാലനിൽ |
| | അതിൽവെച്ച് | ബാലേഷു | ബാലന്മാരിൽ വെച്ച് |
| | വിഷയം | മോക്ഷേ | മോക്ഷവിഷയത്തിൽ |

**प्रथमाविभक्तिः ।**

यस्य पदस्य उच्चारणेन सः शब्दः तमेवार्थं बोधयति सैव प्रथमा विभक्तिः । सामान्येन वाक्ये कर्तृपदस्यैव प्रथमा विभक्तिः इति नाम ।

अधः दीयमानाः शाब्दाः प्रथमाविभक्तिं सूचयन्ति ।

प्रातिपदिकार्थे - रामः , वृक्षः , पशुः. . . . . . . . . . . . . . . .

लिङ्गमात्रे - नरः , नारी , पुस्तकम् , तटः , तटी , तटम्. . . . . . . . . . . .

परिमाणमात्रे - द्रोणः

वचनमात्रे ( संख्या) - एकः , द्वौ , चत्वारः. . . . . . . . . . . . . . . . .

*उदाहरणानि ।*

१. बालकः क्रीडति । २. बालकौ वदतः ।

३. बालकाः धावन्ति । ४. वनिता नृत्यति ।

५. वनिते हसतः । ६. वनिताः पश्यन्ति ।

७. नदी प्रवहति । ८. नद्यौ प्रवहतः ।

९. नद्यः प्रवहन्ति । १०. कविः काव्यं रचयति ।

११. कवयः परस्परं । १२. गुरुः पाठयति ।

१३. धेनवः चरन्ति । १४. मधु कानने भवति ।

१५. पितरः स्वपुत्रान् सम्यक् पालयन्ति । १६. नौः मन्दं चलति ।

१७. वाचः मधुराः भवन्ति । १८. वणिजौ एकत्र तिष्ठतः ।

१९. राजा जनान् रक्षति । २०. अहं मन्दिरे तिष्ठामि ।

२१. आवां चित्रं पश्यावः । २२. वयं गीतं गायामः

२३. त्वं संस्कृतं पठसि । २४. युवां श्लोकान् लिखथः ।

१५. यूयं शाटिकां क्रीणीथ । २६. सः सदा चिन्तयति ।

२७. तौ पूजां कुरुतः । २८. ते वृथा कुप्यन्ति ।

२९. सा बालिका हसति । ३०. ते अध्यपिके अध्यापयतः ।

३१. ताः वाटिकाः शोभन्ते । ३२. आचार्यः शिष्यम् अनुगृह्णाति ।

३३. राजानः युद्धं कुर्वन्ति । ३४. विद्वान् वेदिकायाम् उपविशति ।

३५. विद्वांसः वाक्यार्थविचारं कुर्वन्ति । ३६. भवन्तः कुत्र वसन्ति ।

३७. धीमान् सर्वत्र विजयं लभते ।

**द्वितीयाविभक्तिः।**

कर्ता स्वक्रियया यत् प्राप्तुं नितराम् इच्छति तदेव वाक्ये ' कर्म' इति उच्यते । एतत् कर्म कर्तरिवाक्ये द्वितीयाविभक्तौ कर्मणि वाक्ये प्रथमाविभक्तौ च भवति । ' रामः विद्यालयं गच्छति' इत्यस्मिन् वाक्ये रामस्य महती प्रेप्सा ( प्राप्तुम् इच्छा) विद्यालयप्राप्तिरेव । अतः विद्यालयशब्दे द्वितीया विभक्तिः ।

*उदाहरणानि ।*

१. अध्यापकः बालकं पृच्छति ।

२. राघवः कृष्णं पश्यति ।

३. माता सीताम् आह्वयति ।

४. पिता पुत्रीं लालयति ।

५. भक्तः प्रातः देवं नमति ।

६. बालः मृगान् पश्यति ।

७. तातः सुतां ताडयति ।

८. शिष्यः गुरून् वन्दते ।

९. गोपालकः धेनुं कर्षति ।

१०. पिता पुत्रम् आलिङ्गति ।

११. गायिका कविताः आलपति ।

१२. बालकाः जलं पिबति ।

१३. छात्राः वेदान् अपठन् ।

१४. भक्ताः प्रतिदिनं स्तोत्राणि वाचयेयुः ।

१५. बालिके मातरं वदतः ।

१६. अध्यापिका बालकौ प्रश्नम् अपृच्छत् ।

१७. राजानः शत्रून् संहरन्ति ।

१८. देवाः ब्रह्माणम् अयाचन्त ।

१९. मुनिः स्नानार्थं नदीं गच्छति ।

२०. आवां वाटिकां प्राप्नुव ।

२१. वयं सर्वे गृहम् अगच्छाम ।

२२. महाकविं दृष्ट्वा सज्जनाः अतुष्यन् ।

२३. भवान् कृपया मतिं परिवर्तयतु ।

२४. जनाः सुलभतया वारि लभन्ते ।

२५. नृपः केनचित् कारणेन सेनान्यम् अताडयत् ।

२६. मधुमक्षिकाः शीघ्रं मधूनि सञ्चिन्वन्ति ।

२७. मम पिता गाः अक्रीणात् ।

२८. जनाः वर्षायै जलमुचं प्रार्थयन्ति ।

२९. पण्डितस्य वाचं श्रुत्वा सर्वे विस्मिताः ।

**तृतीयाविभक्तिः ।**

क्रियार्थं वाक्ये यत् अत्यन्तं सहायकं भवति तत् करणम् । यद्यपि द्रष्टा , द्रष्टव्यं चित्रं च स्तः तथापि नेत्राभावे ' दर्शनक्रिया' न सम्भवति , नेत्रयोः भावे क्रिया सम्भवति च । अतः अत्र ' नेत्रं' दर्शनक्रियायाः ' करणं' भवति । ' बालः नेत्राभ्यां चित्रं पश्यति ।' अस्मिन् वाक्ये ' बालः' कर्ता , चित्रं कर्म , ' नेत्राभ्याम्' इति दर्शनक्रियायाः ' करणं' भवति ।

*उदाहरणानि ।*

१. अध्यापकः सुधाखण्डेन लिखति ।

२. कृष्णेन कंसः हतः ।

३. विद्या परिश्रमेण भवति ।

४. बालः मार्गेण सञ्चरति ।

५ . भगवतः दर्शनं <u>पुण्येन</u> भवति ।

६ . रामः <u>दक्षिणेन</u> <u>करेण</u> लिखति ।

७ . अहं <u>मित्रेण</u> सह विद्यालयं गच्छामि ।

८ . <u>जलेन</u> विना जीवनम् अशक्यम् ।

९ . सरः <u>कमलेन</u> विभाति ।

१० . शान्तिः <u>श्रद्धया</u> एव कथां पठति ।

११ . <u>गुडेन</u> मिश्रितम् अन्नं स्वादु भवति ।

१२ . त्वं <u>केन</u> <u>यानेन</u> गृहं गच्छसि ?

१३ . अयं मालाकारः इति <u>कुसुमैः</u> ज्ञायते ।

१४ . <u>समुद्रेण</u> लालितः भवति भारतदेशः ।

१५ . कृष्णः <u>वनमालाभिः</u> भूषितः अस्ति ।

१६ . <u>विद्यया</u> हीनः जनः न शोभते ।

१७ . आवां <u>गीतया</u> प्रबुद्धौ ।

१८ . मम माता पित्रा समं मन्दिरं गता ।

१९ . त्वं <u>नेत्राभ्यां</u> पश्यसि ।

२० . वयं <u>कन्दुकेन</u> क्रीडामः ।

२१ . यूयं <u>कुसुमैः</u> अलङ्कारं कुरुथ ।

२२ . सः <u>धेनुभिः</u> जीवति ।

२३ . दिलीपः <u>राजमार्गेण</u> गच्छति ।

२४ . भारतं <u>केरलदेशेन</u> विभाति ।

२५ . सभा <u>विद्वद्भिः</u> शोभते ।

**चतुर्थीविभक्तिः ।**

कर्ता यत् उद्दिश्य क्रियां करोति तत्र चतुर्थी विभक्तिः भवति । ' छात्रः पठनाय विद्यालयं गच्छति ' इत्यस्मिन् वाक्ये

बालः इति कर्तुः विद्यलयगमनक्रियायाः उद्देश्यं पठनमित्यतः पठनशब्दस्य चतुर्थी विभक्तिः । तद्वत् यमुद्दिश्य दानं करोति तं सूचयितुं चतुर्थीविभक्तिः प्रयोक्तव्या ।

१. जनाः क्षीराय धेनुं पालयन्ति ।

२. अध्यापकः शिष्याय विद्यां यच्छति ।

३. महाराजः पण्डिताय पारितोषिकं ददाति ।

४. आचार्यः शिष्याय उपायनं ददाति ।

५. नदी सर्वेभ्यः जन्तुभ्यः मधुरं जलं यच्छति ।

६. रथवाहकः अश्वेभ्यः तृणम् आनयति ।

७. जननी पुत्रेभ्यः भोजनं पचति ।

८. सर्वे जनाः आत्मशान्तये यतन्ते ।

९. सर्वा नद्यः परोपकाराय एव वहन्ति ।

१०. संस्कृतपठनं पुण्याय भवति ।

११. अग्नये आज्यं समर्पयामि ।

१२. भगवते वासुदेवाय नमः ।

१३. रामाय नमः ।

१४. गुरुः असत्यवादिने अन्तेवासिने क्रुध्यति ।

१५. इदं दुग्धं बालाय अलम् ।

१६. आतङ्कवादिनः साधुभ्यः जनेभ्यः द्रुह्यन्ति ।

१७. वक्तृभ्यः स्वस्ति ।

१८. युवा सुवर्णाय स्पृहयति ।

१९. देशस्य रक्षिता एकस्मै सैनिकाय अकुप्यत् ।

२०. सर्वेभ्यः राजभ्यः मृगया रोचते ।

२१. भ्राता स्वस्त्रे पाठपुस्तकम् आनयति ।

२२ . <u>बुभुक्षितेभ्यः</u> अन्नं रोचते ।

२३ . <u>विदुषे</u> राजा सुवर्णमुद्रिकां प्रयच्छति ।

**पञ्चमीविभक्तिः ।**

यस्मात् वियोगः भवति , यस्मात् यत् श्रेष्ठतरं भवति , यत् हेतुः इत्यर्थे भवति तत् पञ्चमी विभक्तौ भवति । ' वृक्षात् फलं पतति' इत्यस्मिन् वाक्ये फलस्य वृक्षात् वियोगः भवति , अतः वृक्षशब्दस्य पञ्चमी विभक्तिः ।

१. भटः <u>अश्वात्</u> पतति । ( विश्लेषः)

२ . राकेशः <u>रमेशात्</u> सुन्दरः अस्ति । ( श्रेष्ठत्वम्)

३ . कामात् क्रोधोऽपि जायते । ( हेतुः)

४ . <u>वृक्षात्</u> पुष्पाणि पतन्ति ।

५ . नद्यः <u>हिमालयात्</u> प्रभवन्ति ।

६ . शकटः <u>नगरात्</u> बहिः गच्छति ।

७ . इदं रेल्यानं <u>कन्याकुमार्याः</u> कर्णाटकं गच्छति ।

८ . <u>जलात्</u> वैद्युतिम् उदपादयत् ।

९ . <u>मत्</u> बलवत्तरः कः ?

१० . छात्राः <u>विद्यालयात्</u> सुसंस्कृतिं लभन्ते ।

११ . सर्वे <u>सूर्यात्</u> एव ऊर्जं लभन्ते ।

१२ . चोराः <u>आरक्षकात्</u> बिभेति ।

१३ . <u>कस्तूरिमृगात्</u> कस्तूरी लभते ।

१४ . <u>वेदेभ्यः</u> सर्वं विज्ञानं प्राप्तुं शक्यते ।

१५ . अहं रात्रौ <u>गृहात्</u> बहिः न गमिष्यामि ।

१६ . <u>त्रिचक्रिकायाः</u> शीघ्रता लोकयानस्य अस्ति ।

१७ . <u>कृष्णात्</u> रामः श्रेष्ठः अस्ति ।

१८ . मेघात् वृष्टिः वर्षिष्यति ।

१९ . नद्यः सरसः अधिकं प्रवहन्ति ।

२० . गजाः सरसः पङ्कजानि उत्पाटयन्ति ।

२१ . देवाः ब्रह्मणः वरं लभन्ते ।

२२ . बालकः मातुः प्रथमशिक्षां लभते ।

२३ . दरिद्राः दातृभ्यः धनं प्राप्नुवन्ति ।

२४ . यात्रिकः नावः अधः अपतत् ।

२५ . तारकासुरः भगवतः वरं प्राप्य देवान् अपीडयत् ।

**षष्ठीविभक्तिः ।**

द्वयोः नामपदयोः सम्बन्धं सूचयितुं षष्ठी विभक्तिः प्रयुज्यते । स्वस्वामिसम्बन्धः जन्यजनकसम्बन्धः , अवयवावयविसम्बन्धः , इत्यादयः अस्मिन् अन्तर्भवन्ति । ' सीतायाः द्वौ पुत्रौ आस्ताम्' अत्र सीतायाः पुत्रद्वयेन सह सम्बन्धः उक्तः । अतः सीतायाः इति षष्ठी विभक्तिः ।

*उदाहरणानि ।*

१ . दशरथस्य तिस्रः भार्याः आसन् ।

२ . राधायाः हस्ते पुस्तकम् अस्ति ।

३ . सुग्रीवः रामस्य मित्रम् आसीत् ।

उपरितनवाक्येषु सीतायाः दशरथस्य , राधायाः , रामस्य इत्यादीनि पदानि षष्ठी विभक्तौ प्रयुक्तानि ।

४. तव नाम किम् ?

५ . मम नाम सुधा इति भवति ।

६ . हंसस्य वर्णः श्वेतः भवति ।

७ . रामायणस्य कर्ता वाल्मीकिः ।

८ . भारतस्य उत्तरस्यां दिशि हिमालयः अस्ति ।

९ . कन्याकुमार्याः सौन्दर्यं सर्वेषां मनांसि हरति ।

१० . भानोः प्रकाशः भूमिं स्पृशति ।

११. अहं तव पुस्तकं पठामि ।

१२. वृक्षस्य अधः पत्राणि सन्ति ।

१३. सीतायाः पिता भवति जनकः ।

१४. रमायाः पतिः विष्णुः भवति ।

१५. काश्याः दृश्यं पूर्वं सुन्दरम् आसीत् ।

१६. मम गृहस्य दक्षिणतः एका नदी अस्ति ।

१७. मातृणां सभा ( समितिः) शिशुसंरक्षणं करोति ।

१८. हे देवि ! तव चरणयुगं मे शरणम् ।

१९. भारतशासनस्य राजचिह्ने ' सत्यमेव जयते' इति लिखितमस्ति ।

२०. नैयायिकाः मनसः अणुत्वं कल्पयन्ति ।

२१. सर्वेषां पालकः ईश्वरः ।

२२. भवतः गृहं कुत्र वर्तते ?

२३. धेनोः क्षीरं स्वादु भवति ।

२४. पक्षिणां राजा गरुडः अस्ति ।

२५. त्वं विदुषां गणं पश्य ।

**सप्तमीविभक्तिः ।**

एकस्याः व्यक्तेः वस्तुनः वा आधारं सूचयितुं सप्तमी विभक्तेः प्रयोगः क्रियते । ' हस्ते पुस्तकम् अस्ति' अत्र पुस्तकस्य आधारः भवति हस्तः इत्यतः हस्तशब्दस्य सप्तमी विभक्तिः । ' नृपः सिंहासने उपविशति' , अस्मिन् वाक्ये नृपस्य ( राज्ञः) आधारः भवति सिंहासनम् इत्यतः सिंहासनशब्दस्य सप्तमीविभक्तिः ।

१. इक्षौ माधुर्यम् अस्ति ।

२. मोक्षे इच्छा अस्ति ।

३. देवेषु इन्द्रः श्रेष्ठः अस्ति ।

**उदाहरणानि ।**

१. वृक्षे शुकस्य नीडम् अस्ति ।

२. संस्कृतभाषायां सप्त विभक्तयः सन्ति ।

३. समुद्रे रत्नानि सन्ति ।

४. पुस्तकेषु चित्राणि सन्ति ।

५. हैदराबाद्नगरे बोम्बस्फोटनम् अभवत् ।

६. रात्रौ इन्दुः प्रकाशते ।

७. एकस्मिन् हस्ते पञ्च अङ्गुल्यः सन्ति ।

८. रामायणे वर्षायाः वर्णनम् अस्ति ।

९. कविषु कालिदासः श्रेष्ठः ।

१०. मम गृहे अष्ट जनाः सन्ति ।

११. वने सिंहस्य गर्जनम् श्रुणुयात् ।

१२. वाराणस्यां संस्कृतकलालयः वर्तते ।

१३. विमाने यात्रिणः उपविशन्तु ।

१४. भीमः बकस्य केशेषु गृहीतवान् ।

१५. अहम् ईश्वरे विश्वसिमि ।

१६. रामस्य पितरि भक्तिरासीत् ।

१७. गुरौ ज्ञानं वर्तते ।

१८. माता दुहितरि स्निह्यति ।

१९. राजसु रामः सद्गुणसम्पन्नः भवति ।

२०. हंसाः सरत्सु विहरन्ति ।

२१. भीष्मपर्वणि भगवद्गीता अस्ति ।

२२. सा तस्य शिरसि अताडयत् ।

**सतिसप्तमी ।**

सति सप्तमी अथवा भावलक्षणसप्तमी इति कश्चन विशेषप्रयोगः अपि अस्ति । एकस्य कर्तुः , कर्मणः वा क्रियाकालः

अन्यक्रियायाः कालं बोधयति चेत् तत्र सप्तमीविभक्तिः कर्तृपदे भवति ।एवं कर्मणि प्रयोगः चेत् कर्मपदे सप्तमी विभक्तिः भवति । कर्तृविशेषणेऽपि सप्तमी विभक्तिः भवति । 'रामे वनं गते दशरथः दुःखितः' इत्यत्र रामस्य वनगमनकालेन दशरथस्य दुःखकालः सूचितः ।तदा कर्तृपदस्य रामशब्दस्य तस्य विशेषणस्य गत शब्दस्यापि सप्तमीविभक्तौ प्रयोगः ।

१. व्याघ्रे नगरं प्रविष्टे जनाः भीताः अभवन् ।

२. अलङ्कृतेषु गजेषु आगतेषु शिशवः अतुष्यन् ।

३. बालकयोः उद्यानं प्रविष्टयोः सुहृदः आगच्छन् ।

४. सचिवेषु समागतेषु जनाः हस्तताडनम् अकुर्वन् ।

५. बिडाले आगते शुकः पञ्चरं प्राविशत् ।

६. निर्वाचने आसन्ने जनाः उत्सुकाः जाताः ।

**सम्बोधनप्रथमाविभक्तिः ।**

प्रथमाविभक्तेः एकः अवान्तरभागः एव सम्बोधनविभक्तिरिति पूर्वमेव उक्तं खलु । सम्बोधनं तु नामाभिमुखीकृत्य बोधनम् । 'हे बाल गच्छ' अत्र बालम् अभिमुखीकृत्य गमनं कर्तव्यमिति बोधयति इत्यतः 'सम्बोधनप्रथमा' । 'हे' शब्दं विनापि प्रयोक्तुं शक्यते।उदा - बाल! आगच्छ।भो शब्दमपि सम्बोधनार्थं प्रयुज्यते।उदा- भो देवाः।

*उदाहरणानि।*

१. हे देव ! मां रक्ष ।

२. हे पुत्रि ! मा वद ।

३. हे छात्राः ! कोलाहलं मा कुरुत ।

४. हे पुत्र्यौ ! संस्कृतं पठतम् ।

५. हे रमे ! क्रीडामः ।

६. हे कवे ! काव्यं लिख ।

७. हे जननि ! क्षीरं यच्छ ।

८. हे अम्ब ! त्वमेव शरणम् ।

९. हे शम्भो ! रक्ष माम् ।

१०. हे पितः ! अहम् अत्रास्मि ।

११ .  हे मातः !  धनं प्रयच्छ ।

१२ .  हे वणिक् !  कङ्कणं दर्शय ।

१३ .  हे राजानः !  आज्ञापयन्तु ।

१४ .  हे भगवन् !  वरं देहि ।

१५ .  हे विद्वन् !  कथम् अहं संस्कृतं पठिष्यामि ?

१६ .  हे मनः !  रामरसम् अनुभव ।